# संस्कृतवार्ता:
# 27.11.2024
# सायम्  - 06:20

<u>मुख्यवार्ता:</u>

- संसद: सदनद्वयस्य कार्याचरणानि विपक्षिदलानां कोलाहलेन स्थगितानि।
- केन्द्रीय-गृह-मन्त्रालयेन कस्यचिदपि आततायि-आक्रमणस्य साम्मुख्यार्थं जम्मू-नगरे राष्ट्रिय-सुरक्षा-प्रहरी-बलस्य एकं स्थायिकेन्द्रम् निर्मितमस्ति।
- अद्य सायङ्कालं यावत् दक्षिणपश्चिम-बङ्गाल-खाते: उपरि विद्यमानः गहन-भारयुत: फेङ्गल्-चक्रवात: प्रभञ्जनरूपेण वर्धमानः अस्ति।
- भारतीयौ बैडमिण्टन-क्रीडकौ पी.वी.सिन्धु-लक्ष्यसेनौ लखनऊनगरे  अस्य वर्षस्य सैयद-मोदी-अन्ताराष्ट्रिय-बी.डब्ल्यू-एफ्. सुपर-त्रिंशत्-इति क्रीडाचक्रे प्रथमस्तरीय क्रीडायां स्वं-स्वं क्रीडास्पर्धां  विजितवन्तौ।

<u>संसद स्थगनम्</u>

संसदि एकं प्रमुखोद्योगिसमूहं विरुध्य कथितोत्कोचप्रकरणेन सह नैकविषयान् आधृत्य कृतविरोधात्मककोलाहलेन संसदः सदनयोः कार्यजातानि सम्पूर्णदिवसाय स्थगितानि। राज्यसभायां प्रथमस्थगनानन्तरं सदनस्य कार्याणि सार्धैकादशवादने समारब्धानि, परं कांग्रेसस्य, वामपंथिदलानां, डीएमकेदलस्य, तृणमूलकांग्रेसस्य, समाजवादी पार्टीतिदलस्य, आमआदमी पार्टीतिदलस्य अन्येषाञ्च विपक्षिदलानां सदस्यैः कोलाहलात्मकः विरोधः आरब्ध:, फलत्वेन सदनस्य समग्राण्यपि कार्यजातानि आदिवसं स्थगितानि। इत: पूर्वं राज्यसभाध्यक्षेण, उपराष्ट्रपतिना श्रीधनखड़ेन च स्थगनादेशं निरस्तीकृत्य, अभ्यर्थना कृताऽऽसीत्  यत् सदस्याः विचारविनिमये उचितं वातावरणं निर्मापयेयुरिति, परं सदस्यैः तथा न कृतम्। अपरत्र लोकसभायां प्रथमस्थगनानन्तरं यदा द्वादशवादने सदनस्य कार्यजातानि पुनरारब्धानि परं राज्यसभावत् विपक्षिणां विरोधैः कार्यजातम् पूर्णदिवसाय च स्थागितम्।

<u>जम्मू-कश्मीर एनएसजी</u>

केन्द्रीय-गृह-मन्त्रालयेन कस्यचिदपि आततायि-आक्रमणस्य साम्मुख्यार्थं जम्मू-नगरे एनएसजी इत्यस्य राष्ट्रिय-सुरक्षा-प्रहरी-बलस्य एकं स्थायिकेन्द्रम् निर्मितमस्ति। अस्य बलस्य एक: विशिष्टांश: नगरे स्थायिरूपेण निवसति, येन स्थित्यानुरूपं आततायिभि: समं निरसनात्मिका गतिविधि: निमिषेष्वेव कर्तुं शक्ष्यते।

## भारत-जापान-वार्ता:

विदेशसचिव: विक्रममिस्री इत्ययं अद्य टोक्योनगरे संरचनागत-व्यापारं प्रौद्योगिकीं च समेत्य आर्थिकसुरक्षां अवलम्ब्य भारत-जापान-वार्ताया: प्रथमस्य चरणस्य सहाध्यक्षतां जापानदेशीयेन उप-विदेशमन्त्रिणा मासाटाका-ओकानो-इत्यमुना साकं कृतवान्। विहितवार्तायां उभयो: देशयो: हितधारका: मन्त्रालया: विभागा: अभिकरणानि च भागम् अभजन्। अस्या: वार्ताया: चर्चा अस्य वर्षस्य अगस्तमासस्य विंशे दिनांके नवदिल्ल्याम् आयोजिते भारत-जापान – 2+2 इत्यस्मिन् उपवेशनावधौ चर्चिता आसीत्। उभौ देशौ भारत-जापान-देशयो: व्यापार-शैक्षणिक-सहभागितायै नीति-निपुणताया: माध्यमेन आर्थिकहितानां रक्षायै समङ्कितेषु क्षेत्रेषु सरलापूर्ति-श्रृङ्खलायै आधारभूत-संरचनायै च घनिष्ठसहयोगस्य आवश्यकतां सबलं प्रतिपादितवन्तौ।

## पश्चिमबंगाल-चक्रवात:

अद्य सायङ्कालं यावत् दक्षिणपश्चिम-बङ्गाल-खाते: उपरि विद्यमानः गहन-भारयुत: फेङ्गल्-चक्रवात: प्रभञ्जनरूपेण वर्धमानः अस्ति। इदं चेन्नै-नगरात् दक्षिणपूर्वदिशि प्रायः नवत्यधिक-पञ्च-शत-किलोमीटरपरिमाणे दूरे स्थितम् आसीत्। एषा स्थिति: उत्तर-दक्षिण-पूर्व-दिशं-प्रति निरन्तरं गच्छन्ती अग्रिम-द्वादश-होरासु तीव्रतां च प्राप्नुयात्। अग्रिमासु अष्ट चत्वारिंशत् होरासु तमिलनाडु-तटं, श्रीलङ्का-तटं च प्रति निरन्तरं गच्छति। आकाशवाणी इत्यनेन सह वार्तालापं कुर्वन्,आई. एम्. डी. इत्यस्य वरिष्ठवैज्ञानिक: आर्. के. जेनामणिः अवदत् यत्, आन्ध्रप्रदेशस्य तटीये क्षेत्रे अपि प्रचण्डतः अतिभारीवृष्टिः भवितुम् अर्हति। समीपस्थे श्रीलङ्कादेशे, राष्ट्रिय-भवन-अनुसन्धान-सङ्घटनेन कतिपयेषु मण्डलेषु अनेकेषु विभागीय-सचिवालयक्षेत्राणां कृते रक्त वार्णिकी -सूचना प्रदत्ता। द्वीपराष्ट्रस्य सप्त दश मण्डलेषु द्वि लक्षतः अधिकाः जनाः प्रभाविताः सन्ति इति विपद्-व्यवस्थापन-केन्द्रम् अवदत्।

## राष्ट्रपतिः

राष्ट्रपतिः द्रौपदीमुर्मु: तमिलनाडुराज्यस्य चतुर्दिवसीय यात्राया: प्रथमे सोपाने अद्य कोयम्बटूर सम्प्राप्तवती । राष्ट्रपति श्व: वेलिंगटन इत्यत्र रक्षा-सेवा-समूह- महाविद्यालयस्य एकस्मिन् कार्यक्रमे भागं भजिष्यति । अत्रावधौ सङ्काय- सदस्यानां छात्रसङ्घस्य च अधिकारिणः सम्बोधयिष्यति। तदनु राष्ट्रपतिः द्रौपदी मुर्मुः शुक्रवासरे नीलगिर्यां जनजातीय-समुदायैः सह वार्तामपि विधास्यति ।

इजसाइल-सहभागिताज्ञापनं

इजराइल-हिजबुल्लाह इत्यनयो: मध्ये ऐतिहासिक: युद्धविराम: अद्य प्रभृति: क्रियान्वित: जात:। अयं विराम: मासान् यावत् प्रचलितस्य भीषण-सङ्घर्षात् अनन्तरं क्रियान्वितो अभवत्। एतस्मिन् सङ्घर्षे सहस्राधिक जना: मृता:। अमेरिकादेशस्य महत्वपूर्ण-सहयोगेन सह कृता इयं सन्धि: महत्वपूर्णास्ति। अवधेयं वर्तते यत् एषा युद्धविराम-सन्धि: चतुर्दशमासान् यावत् प्रचलिते युद्धे निर्णायकत्वेनापि अभिज्ञायते।

बालविवाह:

प्रशासनेन अद्य नवदिल्ल्यां बाल-विवाह-मुक्त-भारतमिति राष्ट्रियाभियानस्य शुभारम्भो विहित:। अभियानस्यास्य उद्देश्यमस्ति भारतदेश: बालविवाहमुक्तं राष्ट्रं भवेदिति। महिलाबालविकासमन्त्रिणा अन्नपूर्णादेव्या अभियानस्यास्य शुभारम्भ: कुर्वन्त्या प्रोक्तं यत् प्रशासनेन त्रिंशदधिकैकशतजनपदानाम् अभिज्ञानं कृतमस्ति, यत्र अभियानमिदं प्रामुख्येन प्रचालयिष्यते। तयोक्तं यत् बालविवाह: न केवलं एक: अपराधोऽस्ति अपितु मानवाधिकारणाम् उल्लंघनमपि अस्ति। अन्नपूर्णादेव्या निगदितं यत् बालविवाहमुक्तभारतमिति अभियानं केवलं दश-पञ्चदशदिवसानां आयोजनं नास्ति परमिदम् अभियानं निरन्तरतायुत: सत्प्रयासो वर्तते इति।

गुजरात

गुजरातराज्ये अद्य राज्य- प्रशासनेन गान्धीनगरे नूतना कुटीर-ग्रामीण-उद्योग-नीतिः अनावृता, यस्य उद्देश्यं आगामिषु पञ्चसु वर्षेषु अस्मिन् क्षेत्रे द्वादश -लक्षाधिकं प्रत्यक्ष-अप्रत्यक्ष-वृति-अवसरान् कल्पयितुं अस्ति। एतां नीतिम् उद्घाटयन्, कुटीर-उद्योग-राज्यमन्त्री बलवन्तसिंह-राजपूतः अवदत् यत्, एषा नूतन-नीतिः राज्ये ऋण-सौविध्यं विपणि-प्राप्तिं, कौशलं मूलसौकर्याणां विकासं च वर्धयित्वा, राज्यस्य पारम्परिक-हस्तशिल्पानां प्रोत्साहनं संरक्षणं च कृत्वा, स्वावलम्बीनां कुटीर-उद्योगाणां विकासे केन्द्रितास्ति।

इफ्फी-महोत्सव:

अधुना गोवायां समायोक्ष्यमाणे पञ्च- पञ्चाशत्तमे भारतीयान्ताराष्ट्रिय-चलच्चित्र-महोत्सवे सुविख्यातस्य चलच्चित्रनिर्देशकस्य तपनसिन्हा इत्यस्य जीवनयात्राधारित: कार्यक्रम: समायोजित:। आयोजनस्य शीर्षकञ्च असीत्-द स्पेक्ट्रम एण्ड द सोल। अर्जुनचक्रवर्ती, एन.मनु-चक्रवर्ती, शर्मिलाटैगोर इत्येतै: सदस्यै: पूरितेन प्रतिष्ठित समूहेन तपनसिन्हावर्यस्य

अतुलनीयाया: निर्देशककलाया: उपरि स्वमतं प्रकटितम्। आकाशवाण्या सह संवादे श्रीअर्जुन चक्रवर्तिना प्रोक्तं यत् तपनसिन्हा वर्येण अष्टचत्वारिंशत्-चलचित्राणां निर्देशनं कृतम् परं कस्मिन्नपि चलचित्रे विषयस्य शैल्य: च पुनरावृत्ति न कदापि कृतेति। इत: पूर्वं सुविदितस्य चलचित्रकारस्य आशुतोषगोवारिकरस्य अध्यक्षतायुतेन अन्ताराष्ट्रिय-प्रतियोगिताया: निर्णायकमण्डलेन वर्षेऽस्मिन् प्रतियोगिता-वर्गे आगतानां चलचित्राणां विषये स्वमतं स्थापितम्। अस्मत्वार्ताहरेण सह भाषमाण: आशुतोष: अवोचत् यत् प्रतियोगिता श्रेण्यां पञ्चदश-चलचित्राणि असाधारणगुणवत्तायुतानि आसन्। येषु भिन्ना: कथा: भिन्नाश्च शैल्य: आसनिति।

प्रगतिमैदान/व्यापार मेलापकम्

त्रिचत्वारिंशत्तमस्य भारत-अन्ताराष्ट्रिय-व्यापार-मेलकस्य अद्य नवदिल्ल्या: भारत-मण्डपमस्थाने समापनं जातम्। एतस्मिन् चतुर्दश-दिवसात्मके मेलके भारतस्य आर्थिकी सांस्कृतिकी समृद्धि: प्रदर्शिता। जनानां सम्पूर्ण-उत्साह: च अत्रावधौ दृष्ट:। प्रमुखराज्यं झारखण्डमासीत् बिहार-उत्तरप्रदेशराज्ये च सहभागिनौ आस्ताम्। चीन-मिस्र-ईरान-दक्षिणकोरिया-थाईलैण्ड-तुर्की-संयुक्तअरबअमीरात देशा: भागं अभजन्।

पी.वी.सिन्धु

भारतीयौ बैडमिण्टन क्रीडकौ पी.वी.सिन्धु-लक्ष्यसेनौ लखनऊनगरे अस्य वर्षस्य सैयद-मोदी अन्ताराष्ट्रिय-बी.डब्ल्यू-एफ्. सुपर-त्रिंशत्-इति क्रीडाचक्रे प्रथमस्तरीय क्रीडायां स्वं-स्वं क्रीडास्पर्धा विजितवन्तौ।

।।इति वार्ता:।।